अष्टमः पाठः

# पम्पासरोवर्णनम्



संस्कृतवाङ्मये वाल्मीकिरामायणं काव्येषु आदिकाव्यमस्ति। प्रस्तुतश्लोकाः वाल्मीकिरामायणस्य किष्किन्धाकाण्डात् गृहीताः। एतेषु श्लोकेषु पम्पासरोवरस्य प्रकृतेः मनोहरं चित्रणमस्ति। भगवान् रामः सौमित्रस्य कृते प्रकृतेः सजीवं वर्णनं कृतवान्।

*सौमित्रे शोभते पम्पा वैदूर्यविमलोदका।*
*फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ॥1॥*

**अन्वयः** - सौमित्रे! विविधैः द्रुमैः शोभिता, फुल्लपद्मोत्पलवती वैदूर्यविमलोदका पम्पा शोभते।

**शब्दार्थः** -

| | | |
|---|---|---|
| सौमित्रे! | - | लक्ष्मण! |
| विविधैः | - | नानाप्रकारैः |
| द्रुमैः | - | वृक्षैः |
| फुल्लपद्मम् | - | विकसितकमलपुष्पम् |
| वैदूर्यम् | - | रत्नविशेषः |
| विमलोदका | - | स्वच्छजलयुक्ता |

*सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम्।*
*यत्र राजन्ति शैला वा द्रुमाः सशिखराः इव ॥2॥*

**अन्वयः** - सौमित्रे! पम्पायाः शुभदर्शनं काननं पश्य, यत्र द्रुमाः सशिखराः शैलाः इव राजन्ति।

**शब्दार्थः** -

| | | |
|---|---|---|
| सौमित्रे! | - | सुमित्रानन्दन! |
| पम्पायाः | - | पम्पानामसरोवरस्य |
| काननम् | - | वनम् |
| सशिखराः | - | शिखरयुक्ताः |
| द्रुमाः | - | वृक्षाः |
| शैलाः | - | पर्वताः |
| इव | - | यथा (समान) |
| राजन्ति | - | शोभन्ते |

***नलिनैरपि संछन्ना ह्यत्यर्थशुभदर्शना ।***

***सर्पव्यालानुचरिता मृगद्विजसमाकुला ॥3॥***

**अन्वयः** - हि नलिनैः संछन्ना अपि अत्यर्थशुभदर्शना सर्पव्यालानुचरिता मृगद्विजसमाकुला अस्ति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| नलिनैः | - | कमलैः |
| संछन्ना | - | आच्छादिता |
| शुभदर्शना | - | दर्शने अतिशोभना |
| मृगद्विजसमाकुला | - | पशुपक्षिभिः आन्दोलिता (अस्ति) |

***पुष्पभारसमृद्धानि शिखराणि समन्ततः ।***

***लताभिः पुष्पिताग्राभिरूपगूढानि सर्वतः ॥4॥***

**अन्वयः** - समन्ततः शिखराणि पुष्पभारसमृद्धानि । पुष्पिताग्राभिः लताभिः सर्वतः उपगूढानि ।

**शब्दार्थः** -

| | | |
|---|---|---|
| पुष्पभारसमृद्धानि | - | फुल्लकुसुमैः परिपूर्णानि |
| उपगूढानि | - | आच्छादितानि |
| पुष्पिताग्राभिः | - | फुल्लिताग्राभिः (खिले हुए पुष्पों से) |
| लताभिः | - | वल्लरीभिः (लताओं से) |

***प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ।***

***वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥5॥***

**अन्वयः** - वायुवेगप्रचलिताः विविधाः काननद्रुमाः रम्येषु प्रस्तरेषु गां च पुष्पैः अवकिरन्ति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| वायुवेगप्रचलिताः | - | वातैः आन्दोलिताः (वायु के द्वारा हिलाये गये) |
| काननद्रुमाः | - | वन्यवृक्षाः |
| रम्येषु | - | रमणीयेषु |
| प्रस्तरेषु | - | पाषाणखण्डेषु |
| गाम् | - | पृथिवीम् |
| अवकिरन्ति | - | विकिरन्ति (विखेरते हैं) |

***पतितैः पतमानैश्च पादपस्थैश्च मारुतः ।***

***कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः ॥6॥***

**अन्वयः** - सौमित्रे ! पश्य, मारुतः समन्ततः पतितैः पतमानैः च पादपस्थैः कुसुमैः क्रीडति इव ।

**शब्दार्थः** -

| | | |
|---|---|---|
| सौमित्रे ! | - | लक्ष्मण ! |
| मारुतः | - | पवनः |
| पादपस्थैः | - | वृक्षस्थैः |
| कुसुमैः | - | पुष्पैः |
| क्रीडति इव | - | क्रीडन इव दृश्यते (खेलता हुए सा दिखता है) |

*विक्षिपन् विविधाः शाखा नगानां कुसुमोत्कटाः ।*

*मारुतश्चलितस्थानैः षट्पदैरनुगीयते ॥7॥*

**अन्वयः** - नगानां कुसुमोत्कटाः विविधाः शाखाः विक्षिपन् मारुतः चलितस्थानैः षट्पदैः अनुगीयते ।

**शब्दार्थः** -

| | | |
|---|---|---|
| नगानां | - | वृक्षाणाम् |
| कुसुमोत्कटाः | - | पुष्पैः परिपूर्णाः |
| विक्षिपन् | - | आन्दोलयन् |
| मारुतः | - | पवनः |
| चलितस्थानैः | - | स्वस्थानात् विचलितैः |
| षट्पदैः | - | भ्रमरैः |

*स एव सुखसंस्पर्शो वाति चन्दनशीतलः ।*

*गन्धमभ्यवहन् पुण्यं श्रमापनयोऽनिलः ॥8॥*

**अन्वयः** - स एव सुखसंस्पर्शो, चन्दनशीतलः पुण्यं गन्धम् अभ्यवहन्, श्रमापनयः अनिलः वाति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| गन्धमभ्यवहन् | - | गन्धं धारयन् अर्थात् सुरभितः |
| श्रमापनयः | - | श्रमापहारकः (थकावट दूर करती हुई) |
| अनिलः | - | पवनः |
| वाति | - | प्रवहति (बहती है) |

*गिरिप्रस्थेषु रम्येषु पुष्पवद्भिर्मनोरमैः ।*

*संसक्तशिखराः शैलाः विराजन्ति महाद्रुमैः ॥9॥*

**अन्वयः** - पुष्पवद्भिः मनोरमैः महाद्रुमैः रम्येषु गिरिप्रस्थेषु संसक्तशिखराः शैलाः विराजन्ति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| पुष्पवद्भिः | - | पुष्पयुक्तैः |
| मनोरमैः | - | प्रियैः, मनोहरैः |
| महाद्रुमैः | - | विशालैः वृक्षैः |
| गिरिप्रस्थेषु | - | पर्वतानां पृष्ठभागेषु |
| शैलाः | - | पर्वताः |
| विराजन्ति | - | शोभन्ते |

*एवं विचित्राः पतगा नानारावविराविणः ।*

*वृक्षगुल्मलताः पश्य सम्पतन्ति समन्ततः ॥10॥*

**अन्वयः** - पश्य, नानारावविराविणः विचित्राः पतगाः, वृक्षगुल्मलताः समन्ततः सम्पतन्ति ।

**शब्दार्थः -** नानारावविराविणः - विविधस्वरेण कलरवं कुर्वन्तः (भाँति-भाँति बोली बोलने वाले)
पतगाः - पक्षिणः
सम्पतन्ति - उड्डीयन्ते (उड़ते हैं)

***पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम् ।***
***सृजतां पुष्पवर्षाणि वर्षं तोयमुचामिव ॥11॥***

**अन्वयः -** सौमित्रे ! पुष्पशालिनाम् वनानां तोयमुचाम् वर्षम् इव पुष्पवर्षाणि सृजतां रूपाणि पश्य।

**शब्दार्थः -** पुष्पशालिनाम् - पुष्पयुक्तानाम्
तोयमुचाम् - मेघानाम्
वर्षम् - वृष्टिम्

***मत्तकोकिलसंनादैर्नर्तयन्निव पादपान् ।***
***शैलकन्दरनिष्क्रान्तः प्रगीत इव चानिलः ॥12॥***

**अन्वयः -** शैलकन्दरनिष्क्रान्तः अनिलः प्रगीत इव, मत्तकोकिलसन्नादैः पादपान् नर्तयन् इव (वाति)।

**शब्दार्थः -** शैलकन्दरनिष्क्रान्तः - गिरिगुहाभ्यः निर्गतः (पर्वत की कन्दराओं से निकली हुई)
अनिलः - वायुः
संनादैः - कलरवैः (विशेष ध्वनि के साथ)
पादपान् - वृक्षान्

## अभ्यासः

**1. एकपदेन उत्तरत -**

(क) कस्य काननं शुभदर्शनम् ?
(ख) सुखसंस्पर्शः चन्दनशीतलश्च कः वाति ?
(ग) नानारावविराविणः के ?
(घ) कानि पुष्पभारसमृद्धानि ?
(ङ) काननद्रुमाः प्रस्तरेषु कैः अवकिरन्ति ?

**2. एकवाक्येन उत्तरत -**

(क) कीदृशी पम्पा शोभते ?
(ख) मारुतः कीदृशैः कुसुमैः क्रीडति इव ?
(ग) पुष्पिताग्राभिः लताभिः कानि उपगूढानि ?
(घ) श्रमापनयः अनिलः कीदृशः ?
(ङ) के पुष्पैः गाम् अवकिरन्ति ?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत -**

(क) सशिखराः द्रुमाः कीदृशाः राजन्ति ?

(ख) पुष्पशालिनां वनानां पुष्पवर्षा कीदृशी ?

(ग) वैदूर्यविमलोदका पम्पा कथं शोभते ?

(घ) विचित्राः पतगाः कुत्र सम्पतन्ति ?

(ङ) शैलकन्दरनिष्क्रान्तः अनिलः कथं वाति ?

**4. रिक्तस्थानानि पूरयत -**

(क) पश्य रूपाणि सौमित्रे ...................................।

(ख) सौमित्रे पश्य पम्पायाः .................................।

(ग) सौमित्रे शोभते पम्पा ...................................।

(घ) वायुवेग प्रचलिताः ....................................।

(ङ) ...................................... शिखराणि समन्ततः।

**5. विशेष्य-विशेषणानि योजयत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | रम्येषु | महाद्रुमैः |
| (ख) | कुसुमोत्कराः | लताभिः |
| (ग) | चन्दनशीतलः | प्रस्तरेषु |
| (घ) | मनोरमैः | अनिलः |
| (ङ) | पुष्पिताग्राभिः | विविधाः शाखाः |

**6. अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| पश्य | | | | |
| शोभते | | | | |
| वाति | | | | |
| विराजन्ति | | | | |
| सम्पतन्ति | | | | |

7. **प्रकृतिप्रत्ययौ पृथक् कुरुत –**

(क) अभ्यवहन्

(ख) अवकिरन्ति

(ग) विक्षिपन्

(घ) पतमानैः

(ङ) पतितैः

8. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) विमलोदका

(ख) नलिनैरपि

(ग) क्रीडतीव

(घ) अत्यर्थम्

(ङ) मारुतश्च

9. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत –**

(क) मृगद्विजौ

(ख) महाद्रुमः

(ग) वायुवेगप्रचलिताः

(घ) मत्तकोकिलः

(ङ) चन्दनशीतलः

## योग्यताविस्तारः –

- वाल्मीकिरामायणमधिकृत्य ऋतुवर्णनं वर्षावर्णनं ग्रीष्मवर्णनम् इत्यादीनि पठत।